तग अ आ इ ई मेषः। उ ऊ ऋ वृषः। ऋ ऌ ॡ मिथुनम्। ए ऐ कर्कटः। ओ औ सिंहः। अं अः शं षं सं हं लं क्षाः कन्या। कवर्गस्तुला। चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुम्भः। यवर्गो मीनः। स्वराशीनामनुकूलं मन्त्रं भजेत्।

राशीनां शुद्धता ज्ञेया त्यजेत् शुद्धं न्हतिं त्रयम्।
स्वराशेर्मन्त्रराशन्तं गणनीयं विचक्षणैः॥
यदा तु स्वराशेरज्ञानं तदा साधकानामाद्यक्षर-
सम्बन्धिनं राशिं गृहीत्वा गणयेत्॥ *॥

अथ नक्षत्रचक्रम्।

"अ आ अश्विनी देवगणः। इ भरणी मानुषः। ई उ ऊ कृत्तिका राक्षसः। ऋ ऋ ऌ ॡ रोहिणी मानुषः। ए मृगशिरो देवः। ऐ आर्द्रा मानुषः। ओ औ पुनर्वसुर्देवः। क पुष्यो देवः। ख ग अश्लेषा राक्षसः। घ ङ मघा राक्षसः। च पूर्वफल्गुनी मानुषः। छ ज उत्तरफल्गुनी मानुषः। झ ञ हस्ता देवः। ट ठ चित्रा राक्षसः। ड स्वाती देवः। ढ ण विशाखा राक्षसः। त थ द अनुराधा देवः। ध न ज्येष्ठा राक्षसः। प फ ब मूला राक्षसः। भ पूर्वाषाढा मानुषः। म उत्तराषाढा मानुषः। य र श्रवणा देवः। ल व धनिष्ठा राक्षसः। श ष स शतभिषा राक्षसः। ह पूर्वभाद्रपदा मानुषः। क्ष त्र ज्ञ उत्तरभाद्रपदा मानुषः। अं अः त्र रेवती देवः॥ तथा च।

"अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः।
वक्ष्यमाणविधानेन तन्मध्ये वर्णकान् लिखेत्॥
उत्तराद्दक्षिणायान्तु रेखां कुर्याच्चतुष्टयीम्।
दश रेखाः पश्चिमायाः कर्तव्या वीरवन्दिते!॥
अकारादिक्षकारान्तान् द्विचन्द्रवह्निवेदकान्।
भूमीन्द्रनेत्रचन्द्रांश्च अश्वेषान्तं खगौ प्रिये!॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्द्रनेत्राग्निचन्द्रकान्।
मघादिज्येष्ठपर्यन्तं द्वितीयं नवतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युग्मेन्द्रनेत्रवह्निकान्।
वेदेन भेदिता वर्णा रेवत्यग्रगताः क्रमात्॥
पूर्वोत्तराक्षयश्चैव भरण्यार्द्रा च रोहिणी।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
ज्येष्ठाशतभिषामूलाधनिष्ठाश्लेषकृत्तिकाः।
चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्तः पुनर्वसुः।
अनुराधामृगशिरःश्रवणा देवतारकाः॥
स्वाती परमा प्रीतिर्मध्यमा भिन्नजातिषु।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥
जन्म सम्पद्विपत् क्षेमः प्रत्यरिः साधको वधः।
मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः॥"
जन्मत्रिपञ्चसप्तानि वर्ज्यानीमानि नक्षत्राणि।
स्वनक्षत्रादेव नक्षत्रं गणनीयम्। स्वनक्षत्राज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्राद्गणनीयम्॥ *॥

अथाकथहचक्रम्।

"चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्।
पुनश्चतुष्कं तत्रापि लिखेद्धीमान् क्रमेण तु।
इन्द्रमिरुद्रगवनेत्रयुगार्कदिक्षु
ऋक्षरशोऽग्रचतुर्दशभौतिकेषु।
पातालपञ्चदशवह्निहिमांशुकोष्ठे
वर्णान् लिखेत् लिपिभवान् क्रमशस्तु धीमान्॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम्।
चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठकोष्ठेषु सव्यतो नाम आदितः।
सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया मनीषिभिः॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो ग्रहमात्रेण रिपुर्मूलं निहन्यति॥"*॥

अथाकडमचक्रम्।

"रेखाद्वयं पूर्वपरेण कुर्यात्
तन्मध्यतो यान्यकुवेरभेदात्।
महेश्वरयोऽधिपतिक्रमेण
तिर्यक् तथा त्रायुहुताशनेन॥
आकारादिहकारान्तान् स्त्रीवर्णान् लिखेत्ततः।
तथा ऋ ऋ वर्णद्वयं ल ऌ तद्वि स्त्रीवं प्रचक्षते॥
एकैकक्रमतो वेखान् मेषादिषु दयान्तकान्।
गणयेत् क्रमशो भद्रे नामादिवर्णकादिमान्॥
मेषादितश्च मीनान्तं गणयेत् क्रमशः सुधीः।
जन्मः खनामतो मन्त्री यावन्मन्त्रादिमाक्षरम्॥
सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके॥
सुसिद्धस्त्रिसप्तके रुद्रे वेदाष्टद्वादशे रिपुः।
एतत्ते कथितं देवि! अकडमादिकसुत्तमम्॥
तारासुद्धिर्वैद्यवानां कोष्ठसुद्धिः शिवस्य च।
राशिसुद्धिस्त्रिपुरे च गोपालेऽकडमः स्मृतः॥"

अथ ऋणिधनिचक्रम्।

"कोष्ठान्येकादशान्येव वेदेन पूरितानि च।
अकारादिहकारान्तं लिखेत् कोष्ठेषु तत्त्ववित्॥
प्रथमं प्रथमकोष्ठेषु ह्रस्वदीर्घक्रमेण तु।
द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः॥
शेषेष्वेकैकशो वर्णान् क्रमशस्तु लिखेत् सुधीः॥
दौ दौ स्वरौ पञ्चस कोष्ठकेषु
शेषान् स्वरान् षट्सु षड्कमेकम्।
कादीन् हशेषान् विलिखेत्ततोऽर्णा-
नेकैकमेकादशसु त्रिकेषु॥
षट्कालकालवियदग्निसमुद्रवेद-
खाकाशशून्यदहनाः खलु साध्यवर्णाः॥
युग्मद्विपञ्चवियदम्बरयुक्शशाङ्क-
व्योमाग्निवेदशशिनः खलु साधकार्णाः॥
नामाज्भलादकठवादृगणसुक्तशेषं
ज्ञात्वोभयोरधिकशेषवदर्थं धनं स्यात्॥
मन्त्रो यद्यधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके॥
शून्ये मन्त्रं विजानीयात्तस्माच्छून्यं विवर्जयेत्॥"
इति तन्त्रसारः॥ *॥

अथोत्तरायणचक्रं यथा,—

"चक्रं सारं विलिख्य ग्रहपतिरयने संक्रमं यत्
करोति
यस्मिन्नृक्षे तदृक्षं मरणभयकरं शूलमूलेऽपि-
दद्यात्।
तत् पञ्चादारभूते विविधभयकरं शूलपार्श्वे-
लाभः
सख्यं स्यात् शूलमध्ये भवति च नियतं वित्त-
वामक्रमेण॥"

केतुचक्रं यथा,—

"कण्ठे हृदि त्रिभुगे क्रतुमानलाभौ
षट्पृष्ठभं चयकरं धनदं करे त्रिः।
वामे चतुर्थे च रुजं पदयोस्तथाष्टौ
क्रोधो भयञ्च नितरामिह केतुचक्रम्॥"*॥

अहिचक्रं यथा,—

"अथाहिचक्रं वक्ष्यामि विभान्तद्वयशल्ययोः।
ऊर्द्ध्वं रेखाष्टकं लेख्यं तिर्यक् च पञ्चरेखिकाः॥
स्थानद्वारसुखं चक्रमष्टाविंशतिकोष्ठकम्।
तत्र पौष्णान्वियान्यर्क्षत्रिकामघभाग्यभम्॥
उत्तराफल्गुनी लेख्या पूर्वषड्भां भसप्तकम्।
अहिब्रध्नोऽजपादर्क्षं शतभं ब्राह्मसर्पभम्॥
पुष्यं हस्तं समालेख्यं द्वितीयां षड्क्रिमाश्रितम्।
अभिजिद्विष्णुवस्वृक्षं सौम्यं रौद्रं पुनर्वसुम्॥
चित्रभञ्च तृतीयायां षड्क्तौ धिष्ण्यस्य सप्तकम्।
विश्वर्क्षं तोयभं मूलं ज्येष्ठामैत्रविशाखभम्॥
स्वातीं षड्क्तौ चतुर्थ्यान्तु कर्तव्यं पन्नगाद्यति।
द्वारशाखे मघा याम्ये द्वारस्था कृत्तिका ततः॥
अश्वीशपूर्वाषाढादित्रिकपञ्चचतुष्टयम्।
रेवती पूर्वभाद्रेन्दोर्भानि शेषाणि भास्वतः॥
उदयादिगता नाथो भग्नाः षष्ठाग्रशेषके।
दिनेन्दुसुक्तयुक्तोऽसौ भवेत्तत्कालचक्रमाः॥
चन्द्रवत्साधयेत् सूर्यन्दशस्थशेषकालिकम्।
चन्द्र ऋक्षे यदार्केन्दू तदास्ति निहितं निधिः॥
भानु ऋक्षे स्थितौ तौ चेत्तदा शून्यं न संशयः
स्वस्वमे हितयं ज्ञेयं नास्ति किञ्चिद्विपर्यये॥
स्थितं न लभ्यते द्रव्यं चन्द्रे क्रूरग्रहान्विते।
पुष्टे चन्द्रे भवेन्मुद्रा चीजे चन्द्रोऽल्पको निधिः।
हेमतारञ्च ताम्रारं रत्नं कांस्यं तथा जपु।
नागं चन्द्रे विजानीयाद्भास्करादिग्रहे स्थिते॥
मिश्रैर्मिश्रं भवेद्द्रव्यं शून्यं दृष्टिविवर्जिते॥
हेमतारञ्च ताम्रारं पाषाणं लग्नमायसम्।
सूर्यादिग्रहगे चन्द्रे द्रव्यभाङ्गं प्रजायते॥
सुक्तराशांशमानेन भूमानं परिकल्पयेत्।
नीचे छिन्नं परे नीचे जलसंस्थो भवेन्निधिः॥
स्वोच्चस्थे तूर्द्धगं द्रव्यं नवांशक्रमेण च।
परमोच्चे भवेत्तुङ्गे भित्तिस्यन्दनसंक्रमे।
अधिष्ठितं भवेद्द्रव्यं यत्र चन्द्रो ग्रहान्वितः॥"*॥

कुलाकुलचक्रं यथा,—

"द्वितीया दशमी षष्ठी कुलाकुलसुदाहृतम्।
विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः॥
रविचन्द्रौ गुरुः सौरिश्चतुरोऽप्याकुला मताः।
भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः॥
वरुणार्द्राभिजिन्मूलं कुलाकुलसुदाहृतम्।
कुलानि समधिष्ठानि शेषभान्यकुलानि च॥
तिथौ वारे च नक्षत्रे अकुले यायिनो जयः।